**Srii Suuktam**

oṃ || hira'ṇyavarṇāṃ hari'ṇīṃ suvarṇa'rajatasra'jāṃ |
caṃdrāṃ hiraṇma'yīṃ lakṣmīṃ jāta'vedo ma āva'ha ||

tāṃ ma āva'ha jāta'vedo lakṣmīmana'pagāminī''m |
yasyāṃ hira'ṇyaṃ viṃdeyaṃ gāmaśvaṃ puru'ṣānaham ||

aśvapūrvāṃ ra'thamadhyāṃ hastinā''da-prabodhi'nīm |
śriyaṃ' devīmupa'hvaye śrīrmā devīrju'ṣatām ||

kāṃ so''smitāṃ hira'ṇyaprākārā'mārdrāṃ jvalaṃ'tīṃ tṛptāṃ tarpayaṃ'tīm |
padme sthitāṃ padmava'rṇāṃ tāmihopa'hvaye śriyam ||

caṃdrāṃ pra'bhāsāṃ yaśasā jvalaṃ'tīṃ śriyaṃ' loke devaju'ṣṭāmudārām |
tāṃ padminī'mīṃ śara'ṇamahaṃ prapa'dye'lakṣmīrme' naśyatāṃ tvāṃ vṛ'ṇe ||

ādityava'rṇe tapaso'dhi'jāto vanaspatistava' vṛkṣo'tha bilvaḥ |
tasya phalā'ni tapasānu'daṃtu māyāṃta'rāyāśca' bāhyā a'lakṣmīḥ ||

upai'tu māṃ de'vasakhaḥ kīrtiśca maṇi'nā saha |
prādurbhūto'smi' rāṣṭre'smin kīrtimṛ'ddhiṃ dadātu' me ||

kṣutpi'pāsāma'lāṃ jyeṣṭhāma'lakṣīṃ nā'śayāmyaham |
abhū'timasa'mṛddhiṃ ca sarvāṃ nirṇu'da me gṛhāt ||

gaṃdhadvārāṃ du'rādharṣāṃ nityapu'ṣṭāṃ karīṣiṇī''m |
īśvarīgṃ' sarva'bhūtānāṃ tāmihopa'hvaye śriyam ||

śrī''rme bhajatu | alakṣī''rme naśyatu |

mana'saḥ kāmamākū'tiṃ vācaḥ satyama'śīmahi |
paśūnāṃ rūpamanya'sya mayi śrīḥ śra'yatāṃ yaśaḥ' ||

kardame'na pra'jābhūtā mayi saṃbha'va kardama |
śriyaṃ' vāsaya' me kule mātaraṃ' padmamāli'nīm ||

āpaḥ' sṛjaṃtu' snigdāni ciklīta va'sa me gṛhe |
ni ca' devīṃ mātaraṃ śriyaṃ' vāsaya' me kule ||

ārdrāṃ puṣkari'ṇīṃ puṣṭiṃ piṃgalām pa'dmamālinīm |
caṃdrāṃ hiraṇma'yīṃ lakṣmīṃ jāta'vedo ma āva'ha ||

ārdrāṃ yaḥ kari'ṇīṃ yaṣṭiṃ suvarṇām he'mamālinīm |
sūryāṃ hiraṇma'yīṃ lakṣmīṃ jāta'vedo ma āva'ha ||

tāṃ ma āva'ha jāta'vedo lakṣīmana'pagāminī''m |
yasyāṃ hira'ṇyaṃ prabhū'taṃ gāvo' dāsyo'śvā''n, viṃdeyaṃ puru'ṣānaham ||

oṃ mahādevyai ca' vidmahe' viṣṇupatnī ca' dhīmahi |
tanno' lakṣmīḥ pracodayā''t ||

śrī-rvarca'sva-māyu'ṣya-māro''gyamāvī'dhāt pava'mānaṃ mahīyate'' |
dhānyaṃ dhanaṃ paśuṃ bahupu'tralābhaṃ śatasaṃ''vatsaraṃ dīrghamāyuḥ' ||

oṃ śāṃtiḥ śāṃtiḥ śāṃtiḥ' ||

ॐ ॥ हिर'ण्यवर्णां हरि'णीं सुवर्ण'रजतस्र'जां ।
चंद्रां हिरण्म'यीं लक्ष्मीं जात'वेदो म आव'ह ॥

तां म आव'ह जात'वेदो लक्ष्मीमन'पगामिनी''म् ।
यस्यां हिर'ण्यं विंदेयं गामश्वं पुरु'षानहम् ॥

अश्वपूर्वां र'थमध्यां हस्तिना''द-प्रबोधि'नीम् ।
श्रियं' देवीमुप'ह्वये श्रीर्मा देवीर्जु'षताम् ॥

कां सो''स्मितां हिर'ण्यप्राकारा'मार्द्रां ज्वलं'तीं तृप्तां तर्पयं'तीम् ।
पद्मे स्थितां पद्मव'र्णां तामिहोप'ह्वये श्रियम् ॥

चंद्रां प्र'भासां यशसा ज्वलं'तीं श्रियं' लोके देवजु'ष्टामुदाराम् ।
तां पद्मिनी'मीं शर'णमहं प्रप'द्येऽलक्ष्मीर्मे' नश्यतां त्वां वृ'णे ॥

आदित्यव'र्णे तपसोऽधि'जातो वनस्पतिस्तव' वृक्षोऽथ बिल्वः ।
तस्य फ़ला'नि तपसानु'दंतु मायांत'रायाश्च' बाह्या अ'लक्ष्मीः ॥

उपै'तु मां दे'वसख़ः कीर्तिश्च मणि'ना सह ।
प्रादुर्भूतोऽस्मि' राष्ट्रेऽस्मिन् कीर्तिमृ'द्धिं ददातु' मे ॥

क्षुत्पि'पासाम'लां ज्येष्ठाम'लक्षीं ना'शयाम्यहम् ।
अभू'तिमस'मृद्धिं च सर्वां निर्णु'द मे गृहात् ॥

गंधद्वारां दु'राधर्षां नित्यपु'ष्टां करीषिणी''म् ।
ईश्वरीग्ं' सर्व'भूतानां तामिहोप'ह्वये श्रियम् ॥

श्री''र्मे भजतु । अलक्षी''र्मे नश्यतु ।

मन'सः काममाकू'तिं वाचः सत्यम'शीमहि ।
पशूनां रूपमन्य'स्य मयि श्रीः श्र'यतां यशः' ॥

कर्दमे'न प्र'जाभूता मयि संभ'व कर्दम ।
श्रियं' वासय' मे कुले मातरं' पद्ममालि'नीम् ॥

आपः' सृजंतु' स्निग्दानि चिक्लीत व'स मे गृहे ।
नि च' देवीं मातरं श्रियं' वासय' मे कुले ॥

आर्द्रां पुष्करि'णीं पुष्टिं पिंगलाम् प'द्ममालिनीम् ।
चंद्रां हिरण्म'यीं लक्ष्मीं जात'वेदो म आव'ह ॥

आर्द्रां यः करि'णीं यष्टिं सुवर्णाम् हे'ममालिनीम् ।
सूर्यां हिरण्म'यीं लक्ष्मीं जात'वेदो म आव'ह ॥

तां म आव'ह जात'वेदो लक्षीमन'पगामिनी''म् ।
यस्यां हिर'ण्यं प्रभू'तं गावो' दास्योऽश्वा''न्, विंदेयं पुरु'षानहम् ॥

ॐ महादेव्यै च' विद्महे' विष्णुपत्नी च' धीमहि ।
तन्नो' लक्ष्मीः प्रचोदया''त् ॥

श्री-र्वर्च'स्व-मायु'ष्य-मारो''ग्यमावी'धात् पव'मानं महीयते'' ।
धान्यं धनं पशुं बहुपु'त्रलाभं शतसं''वत्सरं दीर्घमायुः' ॥

ॐ शांतिः शांतिः शांतिः' ॥